१७

अष्टाध्याय्याः तृतीयः अध्यायः

प्रस्तावना

पूर्वस्मिन् पाठे भवन्तः केषाञ्चन वैदिकशब्दानाम् प्रयोगम् प्रक्रियाम् च ज्ञातवन्तः। अत्र पाठे इन्, ण्वि, ञ्युट्, विट्, विच्, क्विप् इत्यादिप्रत्ययानाम् प्रयोगः प्रदर्शयिष्यते। किञ्च केचित् निपातनसिद्धशब्दाः अपि आलोचयिष्यन्ते। दश लकारा भवन्ति। तेषु लेट्-लकारस्य प्रयोगो वेदे भवति इति भवन्तः जानन्ति एव। अस्य पाठस्य अन्ते लेट्लकारसम्बन्धिनी चर्चा करिष्यते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- धातोः परे इन्, ण्वि, ञ्युट्, विट्, विच्, क्विप् इत्यादिप्रत्ययाः कदा भवति तद्विषये ज्ञास्यति।
- कांश्चन निपातनेन सिद्धान् शब्दान् ज्ञास्यति।
- लेट्-लकारस्य विशेषताम् अवगमिष्यति।
- छन्दसि लेट्-लकारे रूपप्रक्रियाम् बुध्यात्।।

१७.१) छन्दसि निष्टर्क्यदेवहूय-प्रणीयोन्नीयोच्छिष्य-मर्यस्तर्याध्वर्य-खन्यखान्य-देवयज्यापृच्छ्यप्रतिषीव्य-ब्रह्मवाद्यभाव्य-स्ताव्योपचाय्य-पृडानि॥ (३.१.१२३)

सूत्रार्थः - निष्टर्क्यादयः शब्दाः छन्दसि निपात्यन्ते।

सूत्रावतरणम् - छन्दसि निष्टर्क्य-देवहूय-प्रणीय-उन्नीय-उच्छिष्य-मर्य-स्तर्या-ध्वर्य-खन्य-खान्य-देवयज्या-अपृच्छ्य-प्रतिषीव्य-ब्रह्मवाद्य-भाव्य-स्ताव्य-उपचाय्य-पृड शब्दानां निपातनार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण उक्तपदानि निपात्यन्ते। अस्मिन् सूत्रे द्वे पदे स्तः। तत्र छन्दसि इति सप्तम्येकवचनान्तं पदम्। निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्य-भाव्यस्ताव्योपचाय्यपृडानि इति प्रथमाबहुवचनान्तं पदम्। निपात्यन्ते इति अध्याह्रियते। निपातनं नाम किमिति चेत् सिद्धप्रक्रियस्य निर्देशो हि निपातः। ततश्च सूत्रार्थो भवति छन्दसि निष्टर्क्य-देवहूय-प्रणीय-

उन्नीय-उच्छिष्य-मर्य-स्तर्या-ध्वर्य-खन्य-खान्य-देवयज्या-अपृच्छय-प्रतिषीव्य-ब्रह्मवाद्य-भाव्य-स्ताव्य-उपचाय्य-पृड-शब्दाः निपात्यन्ते इति।

उदाहरणम् -

एतेषाम् उदाहरणानि यथा "निष्टर्क्यं चिन्वीत पशुकामः"। "स्पर्धन्ते वा उ देवहूये"। "आपृच्छयं धरुणं वाज्यर्षति"। इत्यादीनि।

तत्र **निष्टर्क्य** इत्यत्र निस्-पूर्वक-कृत्-धातोः क्यप्प्रत्यये प्राप्ते निपातनात् ण्यत्प्रत्यये ऋकारस्य गुणे रपरत्वे निस् कर् त् य इत्यवस्थायाम् आद्यन्तवर्णद्वयस्य विपर्यये अर्थात् ककारतकारयोः विपर्यये निस् तर् क् य इति जाते सस्य षत्वे तकारस्य च टकारे निष्टर्क्य इति रूपम्। लोके **निष्कृत्य** इति रूपं भवति।

देवहूयः- देवानां ह्वानं हवनं वा इति विग्रहे देवशब्दपूर्वकात् ह्वेधातोः हूधातोः वा क्यप्प्रत्यये दीर्घे निपातनात् तुगभावे **देवहूयः** इति रूपं भवति।

प्रणीयः- प्रपूर्वकात् णीधातोः क्यप्प्रत्यये प्रणीय इति रूपम्। लोके तु यत्प्रत्यये **प्रणेय** इति रूपं भवति।

उन्नीयः- उत्पूर्वकात् नीधातोः क्यप्प्रत्यये रूपमिदम्। लोके तु **उन्नेयः** इति रूपं भवति।

उच्छिष्यम्- उत्पूर्वकात् शिष्-धातोः क्यप्प्रत्यये उच्छिष्यम् इति रूपम्। लोके तु **उच्छेष्यम्** इति रूपं भवति।

मर्यः- मृधातोः यत्प्रत्यये रूपमिदम्। लोके तु ण्यत्प्रत्यये **मार्यः** इति रूपं भवति।

स्तर्या- स्तृधातोः यत्प्रत्यये स्त्रियां टापि स्तर्या इति रूपम्। इदं रूपं स्त्रीलिङ्गान्ततया निपात्यते। लोके तु स्तृधातोः ण्यत्प्रत्यये **स्तार्यः** इति रूपं भवति।

ध्वर्यः- ध्वृधातोः यत्प्रत्यये ध्वार्यः इति रूपम्। लोके तु ण्यत्प्रत्यये **ध्वार्यः** इति रूपं भवति।

खन्यः, खान्यः- खन्धातोः यत्प्रत्यये खन्यः इति रूपम्। खन्धातोः ण्यत्प्रत्यये खान्यः इति रूपम्। लोके तु उभयत्र यत्प्रत्यये **खेयः** इति रूपं भवति।

देवयज्या- देवानां यजनम् इति व्युत्पत्त्या देवोपपदक-यज्धातोः यति स्त्रियां टापि रूपमिदम्। लोके **इज्या** इति रूपं भवति।

अपृच्छयः- आङ्पूर्वक-प्रच्छ्-धातोः क्यप्प्रत्यये रूपमिदम्। लोके तु ण्यत्प्रत्यये **आप्राच्छयः** इति रूपं भवति।

प्रतिषीव्यः- प्रतिपूर्वकसिव्-धातोः क्यप्प्रत्यये सस्य षत्वे इकारस्य हलि च इत्यनेन दीर्घे प्रतिषीव्य इति रूपम्। लोके तु **प्रतिषेव्यः** इति रूपं भवति।

ब्रह्मवाद्यम्- ब्रह्मणः वेदस्य वदनम् इति विग्रहे ब्रह्मन्नुपपदक-वद्-धातोः ण्यति रूपमिदम्। लोके क्यप्प्रत्यये यत्प्रत्यये वा **ब्रह्मोद्यम्, ब्रह्मवद्यं** चेति रूपद्वयं भवति।

भाव्यः, स्ताव्यः- भूधातोः स्तुधातोः ण्यति यथाक्रमं भाव्यः स्ताव्यः इति रूपद्वयं भवति। लोके तु भूधातोः यत्प्रत्यये **भव्यः** इति, स्तुधातोः क्यप्प्रत्यये **स्तुत्यः** इति रूपद्वयं भवति।

उपचाय्यपृडम्- पृडयति सुखयति इति विग्रहे पृड्-धातोः क्यप्प्रत्यये **पृडः** इति रूपम्। उपचाय्यं च तत् पृडम् च इति विग्रहे कर्मधारयसमासे **उपचाय्यपृडम्** इति रूपम्। अत्र पृड इति उत्तरपदे परतः उपपूर्वकचिधातोः ण्यत्प्रत्यये अयादेशः निपात्यते।

१७.२) छन्दसि वनसनरक्षिमथाम्॥ (३.२.२७)

सूत्रार्थः - एभ्यः कर्मण्युपपदे इन् स्यात्।

सूत्रावतरणम् - छन्दसि वन्-धातोः सन्-धातोः रक्ष्-धातोः मथ्-धातोः च कर्मणि उपपदे इन्-प्रत्ययविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण इन्-प्रत्ययः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। छन्दसि इति सप्तम्येकवचनान्तं पदम्। वनसनरक्षिमथाम् इति षष्ठीबहुवचनान्तं पदम्। अत्र पञ्चम्यर्थे षष्ठी बोद्धव्या। स्तम्बशकृतोरिन् इति सूत्रात् इन् इति अनुवर्तते। कर्मणि भृतौ इति सूत्रात् कर्मणि इत्यनुवर्तते। धातोः प्रत्ययः परः चेति अधिकृतमस्ति। धातोः इत्यस्य धातुभ्यः इति पञ्चमीबहुवचनान्ततया विपरिणामः। तदा छन्दसि वनसनरक्षिमथ् इत्येतेभ्यः धातुभ्यः कर्मणि इन् प्रत्ययः परः इति वाक्ययोजना। सूत्रार्थो हि छन्दसि वन्-धातोः सन्-धातोः रक्ष्-धातोः मथ्-धातोः च कर्मणि उपपदे इन्-प्रत्ययः परः स्यादिति। तत्र वन्-धातोः याचनम् अर्थः। सन्-धातुः दानार्थकः। रक्ष्-धातुः पालनार्थवाची। मथ्-धातुः विलोडनार्थकः।

उदाहरणम् - ब्रह्मवनिं त्वा क्षत्रवनिम् इति वेदे प्रयोगः। तत्र ब्रह्म वनति इति व्युत्पत्तौ कर्मण्युपपदे प्रकृतसूत्रेण याचनार्थकात् वन्-धातोः इन्-प्रत्यये प्रक्रियया ब्रह्मन् वन् इन् इति स्थिते अनुबन्धलोपे ब्रह्मन् वन् इ इति स्थिते नलोपः प्रातिपदिकान्तस्य इत्यनेन प्रातिपदिकान्तस्य ब्रह्मन् इत्यस्य नकारस्य लोपे ब्रह्म वन् इ इति स्थिते सम्पूर्णस्य ब्रह्मवनि इति जाते उपपदसमासे प्रातिपदिकसंज्ञायां द्वितीयैकवचनविवक्षायाम् अमि ब्रह्मवनि अम् इति स्थिते अमि पूर्वः इत्यनेन पूर्वरूपैकादेशे **ब्रह्मवनिम्** इति रूपम्। क्षत्रवनिमपि तथैव। गोषणिं पथिरक्षी हविर्मथिः इत्यादीनि उदाहरणान्तराणि।

१७.३) छन्दसि सहः॥ (३.२.६३)

सूत्रार्थः - सुप्युपपदे सहेर्ण्विः स्यात्।

सूत्रावतरणम् - सुबन्ते उपपदे सह्-धातोः ण्वि-प्रत्ययविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण ण्विप्रत्ययः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। तत्र छन्दसि इति सप्तम्येकवचनान्तं पदम्। सहः इति पञ्चम्येकवचनान्तं पदम्। भजो ण्विः इति सूत्रात् ण्विः इत्यनुवर्तते। सुपि इत्यस्य अनुवृत्तिः भवति। धातोः प्रत्ययः परः चेति अधिकृतमस्ति। छन्दसि सहः धातोः ण्विः प्रत्ययः सुपि इति वाक्ययोजना। सूत्रार्थो हि छन्दसि सह्-धातोः सुबन्ते उपपदे ण्वि-प्रत्ययः परः स्यात् इति। सह्-धातोः च अर्थः भवति मर्षणम् इति।

उदाहरणम् -

पृतनाषाट् इत्युदाहरणम्। पृतनां सहते इति व्युत्पत्तौ सुबन्तोपपदे सह्-धातोः प्रकृतसूत्रेण ण्वि-प्रत्यये पृतना सह् ण्वि इति स्थिते अनुबन्धलोपे पृतना सह् इति स्थिते अत उपधायाः इत्यनेन उपधावृद्धौ पृतना साह् इति स्थिते उपपदसमासे प्रातिपदिकसंज्ञायां सौ अनुबन्धलोपे पृतनासाह् स् इति स्थिते हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् इत्यनेन सकारलोपे हो ढः इत्यनेन हस्य ढकारे पृतनासाढ् इति स्थिते झलां जशोऽन्ते इत्यनेन ढकारस्य डकारे अवसानसंज्ञायां वावसाने इत्यनेन डकारस्य टकारे **पृतनाषाट्** इति रूपम्।

१७.४) वहश्च॥ (३.२.६४)

सूत्रार्थः - छन्दसि सुप्युपपदे वहः ण्विः स्यात्।

सूत्रावतरणम् - सुबन्तोपपदे वहः धातोः ण्वि-प्रत्ययविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्यख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण सुबन्तोपपदे वहः धातोः ण्वि-प्रत्ययः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। वहः च इति सूत्रगतपदच्छेदः। वहः इति पञ्चम्येकवचनान्तं पदम्। च इति अव्ययपदम्। भजो ण्विः इति सूत्रात् ण्विः इत्यनुवर्तते। छन्दसि सहः इति सूत्रात् छन्दसि इत्यनुवर्तते। सुपि इत्यस्य अनुवृत्तिः भवति। धातोः प्रत्ययश्चेति अधिकृतमस्ति। छन्दसि वहः धातोः ण्विः प्रत्ययः सुपि इति वाक्ययोजना। ततश्च सूत्रर्थः भवति छन्दसि सुबन्तोपपदे वह्-धातोः ण्वि-प्रत्ययः स्यात् इति।

उदाहरणम् - दित्यवाट् इत्युदाहरणम्।

सूत्रार्थसमन्वयः - दित्यं वर्षद्वयं वहति इति विग्रहे सुबन्तोपपदे वह्-धातोः प्रकृतसूत्रेण ण्वि-प्रत्यये अनुबन्धलोपे दित्य वह् इति स्थिते अत उपधायाः इत्यनेन उपधावृद्धौ दित्य वाह् इति जाते उपपदसमासे प्रातिपदिकसंज्ञायां सौ अनुबन्धलोपे दित्यवाह् स् इति जाते हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् इत्यनेन सकारलोपे हो ढः इत्यनेन हस्य ढकारे दित्यवाढ् इति जाते झलां जशोऽन्ते इत्यनेन ढकारस्य डकारे वावसाने इत्यनेन डकारस्य टकारे **दित्यवाट्** इति रूपम् सिध्यति।

१७.५) हव्येऽनन्तःपादम्॥ (३.२.६६)

सूत्रार्थः - हव्ये सुपि चोपपदे छन्दसि अनन्तःपादं वहः ञ्युट्।

सूत्रावतरणम् - हव्ये उपपदे सुबन्तोपपदे च छन्दसि अनन्तःपादं वहः ञ्युट्-प्रत्ययविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण ञ्युट्-प्रत्ययः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। हव्ये अनन्तःपादम् इति सूत्रगतपदच्छेदः। हव्ये इति सप्तम्येकवचनान्तं पदम्। अनन्तःपादम् इति प्रथमैकवचनान्तं पदम्। अन्तः मध्ये पादस्येति अन्तःपादम् इति अव्ययीभावसमासः। न अन्तःपादम् अनन्तःपादम् इति नञ्तत्पुरुषसमासः। वहश्च इति सूत्रात् वहः इत्यनुवर्तते। छन्दसि सहः इति सूत्रात् छन्दसि इत्यनुवर्तते। काव्यपुरीषपुरीष्येषु ञ्युट् इति सूत्रात् ञ्युट् इत्यनुवर्तते। सुपि इत्यनुवर्तते। धातोः प्रत्ययः परः चेति अधिकृतम्। भवति इति अध्याह्रियते। तदा च वाक्ययोजना भवति हव्ये सुपि छन्दसि अनन्तःपादं वहः धातोः ञ्युट् प्रत्ययः परः इति। सूत्रार्थस्तावत् हव्ये उपपदे सुबन्तोपपदे च छन्दसि

अनन्तःपादं वह्-धातोः ञ्युट्-प्रत्ययः भवति इति। अर्थात् हव्ये उपपदे सुबन्तोपपदे च छन्दसि वह्-धातोः ञ्युट्-प्रत्ययः भवति पादयोर्मध्यस्थे तु न भवति इति। अपि तु पादमध्ये वहश्च इत्यनेन ण्विरेव भवति।

उदाहरणम् - अग्निश्च हव्यवाहनः इति वैदिकप्रयोगः।

सूत्रार्थसमन्वयः - तत्र हव्यवाहनः इत्यत्र हव्यं वहति इति विग्रहे हव्योपपदे वह्-धातोः प्रकृतसूत्रेण ञ्युट्-प्रत्यये अनुबन्धलोपे हव्य वह् यु इति स्थिते अत उपधायाः इत्यनेन उपधावृद्धौ हव्य वाह् यु इति जाते युवोरनाकौ इत्यनेन यु इत्यस्य अनादेशे संयोगे सम्पूर्णस्य हव्यवाहन इत्यस्य उपपदसमासे प्रातिपदिकसंज्ञायां सौ विभक्तिकार्ये **हव्यवाहनः** इति रूपम् सिध्यति।

१७.६) जनसनखनक्रमगमो विट्॥ (३.२.६७)

सूत्रार्थः - उपसर्गे सुपि चोपपदे एभ्यश्छन्दसि विट्। (शेखरः)

सूत्रावतरणम् - उपसर्गे उपपदे सुपि उपपदे च जन्-धातोः सन्-धातोः खन्-धातोः क्रम्-धातोः गम्-धातोः च विट्-प्रत्ययविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण विट्-प्रत्ययः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। जनसनखनक्रमगमः इति पञ्चम्येकवचनान्तं पदम्। विट् इति प्रथमान्तं पदम्। छन्दसि सहः इति सूत्रात् छन्दसि इत्यनुवर्तते। उपसर्गे सुपि चेत्यपि अनुवर्तते। धातोः प्रत्ययः परः चेति अधिकृतमस्ति। उपसर्गे सुपि जनसनखनक्रमगमः धातोः विट् प्रत्ययः परः इति वाक्ययोजना। ततश्च सूत्रार्थः भवति उपसर्गे उपपदे सुबन्तोपपदे च जन्-धातोः सन्-धातोः खन्-धातोः क्रम्-धातोः गम्-धातोः च विट्-प्रत्ययः परः स्यादिति।

उदाहरणम् - अब्जः।

सूत्रार्थसमन्वयः- अप्सु जायते इति विग्रहे अप्सु इति सुबन्तोपपदे प्रकृतसूत्रेण विट्-प्रत्यये अप् जन् विट् इति स्थिते विटः सर्वापहारलोपे अप् जन् इति स्थिते विट्-वनोरनुनासिकस्यात् इति सूत्रेण नकारस्य आकारादेशे अप् ज आ इति स्थिते सवर्णदीर्घे अप् जा इति स्थिते झलां जशोऽन्ते इत्यनेन पकारस्य बकारादेशे संयोगे निष्पन्नस्य अब्जा इत्यस्य उपपदसमासे प्रातिपदिकसंज्ञायां सौ विभक्तिकार्ये **अब्जाः** इति रूपम्। एवं **गोजाः गोषाः** इत्यादीन्युदाहरणानि।

१७.७) मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्॥ (३.२.७१)

सूत्रार्थः - मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् स्यात्।

सूत्रावतरणम् - मन्त्रे श्वेतवह् उक्थशस् पुरोडाश् इति सूत्रपठितशब्देभ्यः ण्विन्-प्रत्ययविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण ण्विन्-प्रत्ययः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। मन्त्रे इति सप्तम्येकवचनान्तं पदम्। श्वेतवहोक्थशस्पुरोडाशः इति पञ्चम्येकवचनान्तं पदम्। ण्विन् इति प्रथमान्तं पदम्। प्रत्ययः परः चेति अधिकृतमस्ति। ततश्च सूत्रार्थो भवति मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् प्रत्ययः परः स्यात् इति।

उदाहरणम् - श्वेतवाहौ इत्युदाहरणम्।

सूत्रार्थसमन्वयः - प्रकृतसूत्रेण श्वेतवह्-शब्दात् ण्वि-प्रत्यये अनुबन्धलोपे श्वेतवह् इति स्थिते अतो उपधायाः इत्यनेन उपधावृद्धौ श्वेतवाह् इति जाते उपपदसमासे प्रातिपदिकसंज्ञायाम् औ-प्रत्यये सर्ववर्णसम्मेलने **श्वेतवाहौ** इति रूपम्। एवं **श्वेतवाहः** इत्यादि उदाहरणम् स्वयम् बोद्धव्यम्।

पाठगतप्रश्नाः-१

१. निपातनं नाम किम्।
२. वन्-धातोः अर्थः कः।
३. पृतनां सहते इति अर्थे किं रूपं भवति।
४. दित्यवाढ् इति स्थिते ढकारस्य डकारः केन सूत्रेण भवति।
५. छन्दसि वनसनरक्षिमथाम् इत्यस्य कोऽर्थः।
६. ञ्युट्-प्रत्ययः केन विधीयते।
७. ण्विप्रत्ययविधायकं सूत्रमेकं लिखत।
८. वहश्च इत्यस्य कोऽर्थः।

१७.८) अवे यजः॥ (३.२.७२)

सूत्रार्थः - अवे उपपदे यज्-धातोः मन्त्रे ण्विन् स्यात्।

सूत्रावतरणम् - मन्त्रे अवे उपपदे यज्-धातोः ण्विन्-प्रत्ययविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण अवे उपपदे यज्-धातोः ण्विन् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अवे इति सप्तम्येकवचनान्तं पदम्। यजः इति पञ्चम्येकवचनान्तं पदम्। मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् इति सूत्रात् मन्त्रे ण्विन् चेति पदद्वयमनुवर्तते। धातोः प्रत्ययः परः अधिकृतमस्ति। तदा च मन्त्रे अवे यजः धातोः ण्विन् प्रत्ययः परः इति वाक्ययोजना। ततश्च सूत्रार्थः भवति मन्त्रे अवे उपपदे यज्-धातोः ण्विन्-प्रत्ययः परः स्यात् इति।

उदाहरणम् - अवयाजौ।

सूत्रार्थसमन्वयः- अवे उपपदे यज्-धातोः प्रकृतसूत्रेण ण्विन्प्रत्यये ण्विन्-प्रत्ययस्य सर्वापहारलोपे अव यज् इति स्थिते यज्-धातोः अकारस्य अलोऽन्त्यात्पूर्व उपधा इत्यनेन उपधासंज्ञायाम् अत उपधायाः इत्यनेन उपधायाः अकारस्य वृद्धौ स्थानतः आन्तर्यात् आकारे अव याज् इति स्थिते संयोगे उपपदसमासे कृत्तद्धितसमासाश्च इत्यनेन प्रातिपदिकसंज्ञायां ततश्च ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्

इति सूत्रेण खले कपोतन्यायेन एकविंशतिस्वादिप्रत्ययेषु प्राप्तेषु प्रथमाद्विवचनविवक्षायाम् औ-प्रत्यये सर्ववर्णसम्मेलने **अवयाजौ** इति रूपम्।

१७.९) अवयाः श्वेतवाः पुरोडाश्च॥ (८.२.६७)

सूत्रार्थः - एते सम्बुद्धौ कृतदीर्घाः निपात्यन्ते।

सूत्रावतरणम् - संबुद्धौ परे अवयाः श्वेतवाः पुरोडाः इत्येतेषां कृतदीर्घाणां शब्दानां निपातनार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। अवयाः श्वेतवाः पुरोडाः च इति सूत्रगतपदच्छेदः। अवयाः श्वेतवाः पुरोडाः चेति पदत्रयं प्रथमैकवचनान्तम्। च इति अव्ययपदम्। संबुद्धौ इति पदं लभ्यते। चकारबलात् उक्थशाः इत्यस्यापि ग्रहणं भवति। तदा च अवयाः श्वेतवाः पुरोडाः उक्थशाः च संबुद्धौ इति वाक्ययोजना। ततश्च सूत्रार्थः भवति सम्बुद्धौ कृतदीर्घाः अवयाः श्वेतवाः पुरोडाः उक्थशाः इत्येते शब्दाः निपात्यन्ते इति।

उदाहरणम् - अवपूर्वकयज्-धातोः, श्वेतपूर्वकवह्-धातोः, पुरस्पूर्वकदास्-धातोः "मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्" तथा "अवे यजः" इति सूत्रेण ण्विन्प्रत्यये प्राप्तौ "श्वेतवहादीनां डस् पदस्येति वक्तव्यम्" इति वार्तिकेन डस्प्रत्यये एतानि रूपाणि भवन्ति। अत्र सम्बोधनैकवचने दीर्घः निपात्यते।

१७.१०) विजुपे छन्दसि॥ (३.२.७३)

सूत्रार्थः - उपे उपपदे यजेर्विच्।

सूत्रावतरणम् - उपे उपपदे यज्-धातोः विच्-प्रत्ययविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण यज्-धातोः विच्-प्रत्ययः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। विच् उपे छन्दसि इति सूत्रगतपदच्छेदः। विच् इति प्रथमान्तं पदम्। उपे इति सप्तम्येकवचनान्तं पदम्। छन्दसि इति अपि सप्तम्यन्तं पदम्। अवे यजः इति सूत्रात् यजः इत्यनुवर्तते। धातोः प्रत्ययः परः चेति अधिकृतमस्ति। ततश्च सूत्रार्थः भवति उपे उपपदे यज्-धातोः विच्-प्रत्ययः स्यात् इति।

उदाहरणम् - उपयट्।

सूत्रार्थसमन्वयः:- उपपूर्वक-यज्-धातोः विच्-प्रत्यये उप यज् विच् इति स्थिते विचः सर्वापहारलोपे उप यज् इति जाते संयोगे उपपदे समासे निष्पन्नस्य उपयज् इति जाते उपपदसमासे प्रातिपदिकसंज्ञायां कृत्तद्धितसमासाश्च इत्यनेन तस्य प्रातिपदिकसंज्ञायां ततश्च ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिस्वादिप्रत्ययेषु प्राप्तेषु प्रथमैकवचनविवक्षायां सौ अनुनासिकत्वेन पाणिनीयैः प्रतिज्ञातस्य सुप्रत्ययस्य उकारस्य उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण तस्य

इत्संज्ञकस्य उकारस्य च लोपे उपयज् स् इति जाते हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् इत्यनेन सकारलोपे व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः इत्यनेन जकारस्य षकारे उपयष् इति जाते झलां जशोऽन्ते इत्यनेन षकारस्य जश्त्वे स्थानत आन्तर्यात् डकारे डकारात्परस्य वर्णाभावस्य विरामोऽवसानम् इति सूत्रेण अवसानसंज्ञायाम् अवसानपरकत्वात् च वावसाने इत्यनेन डकारस्य टकारे **उपयट्** इति रूपम्।

१७.११) आतो मनिन्क्वनिब्वनिपश्च॥ (३.२.७४)

सूत्रार्थः - सुप्युपसर्गे चोपपदे आदन्तेभ्यो धातुभ्यः छन्दसि विषये मनिनादयस्त्रयः प्रत्ययाः स्युः। चाद्विच्।

सूत्रावतरणम् - सुबन्तोपपदे उपसर्गोपपदे च छन्दसि विषये आदन्तेभ्यो धातुभ्यः मनिन्-क्वनिप्-वनिप्-विच् प्रत्ययविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण मनिन्, क्वनिप्, वनिप्, विच् इति एते प्रत्ययाः विधीयन्ते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। आतः मनिन्क्वनिब्वनिपः च इति सूत्रगतपदच्छेदः। आतः इति पञ्चम्यन्तं पदम्। मनिन्क्वनिब्वनिपः इति प्रथमाबहुवचनान्तं पदम्। च इति अव्ययपदम्। विजुपे छन्दसि इति सूत्रात् विच् छन्दसि चेति पदद्वयमनुवर्तते। सुपि उपसर्गे इत्यपि अनुवर्तते। धातोः प्रत्ययः परः चेति अधिकृतमस्ति। अत्र आतः इति विशेषणम्, धातोः इति विशेष्यम्। ततः तदन्तविधौ आदन्तात् धातोः इत्यर्थलाभः। ततश्च सूत्रार्थो भवति सुबन्तोपपदे उपसर्गोपपदे च छन्दसि विषये आदन्तेभ्यो धातुभ्यः मनिन्-क्वनिप्-वनिप्-विच्-प्रत्ययाः पराः स्युः इति।

उदाहरणम् - सुदामा इत्युदाहरणम्।

सूत्रार्थसमन्वयः- शोभनं ददाति इति विग्रहे शोभनम् इति सुबन्तोपपदे दा-धातोः आदन्तत्वात् प्रकृतसूत्रेण मनिन्-प्रत्यये अनुबन्धलोपे सु दा मन् इति स्थिते उपपदसमासे प्रातिपदिकसंज्ञायां सौ अनुबन्धलोपे सुदामन् स् इति जाते सर्वनामस्थाने चासम्बुद्धौ इत्यनेन उपधावृद्धौ सलोपे नकारलोपे च **सुदामा** इति रूपम्।

१७.१२) बहुलं छन्दसि॥ (३.२.८८)

सूत्रार्थः - उपपदान्तरेऽपि हन्तेर्बहुलं क्विप् स्यात्।

सूत्रावतरणम् - उपपदान्तरेऽपि हन्-धातोः बहुलं क्विप्-प्रत्ययविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण हन्-धातोः बहुलं क्विप्-प्रत्ययः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। बहुलम् इति प्रथमान्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्। ब्रह्मभ्रूणवृत्रेषु क्विप् इत्यस्मात् सूत्रात् क्विप् इत्यनुवर्तते। कर्मणि हनः इति सम्पूर्णं सूत्रमत्र अनुवर्तते। भूते इति सूत्रमपि अनुवर्तते। धातोः प्रत्ययः परः चेति अधिकृतमस्ति। ततश्च सूत्रार्थः भवति कर्मणि उपपदे हन्-धातोः भूते क्विप्-प्रत्ययः परः स्यात् इति।

उदाहरणम् - मातृहा इत्युदाहरणम्।

सूत्रार्थसमन्वयः:- मातरं हतवान् इति विग्रहे कर्मणि उपपदे भूते हन्-धातोः प्रकृतसूत्रेण क्विप्-प्रत्यये मातृ हन् क्विप् इति स्थिते क्विपः सर्वापहारलोपे उपपदसमासे प्रातिपदिकसंज्ञायां सौ अनुबन्धलोपे मातृहन् स् इति स्थिते सौ च इत्यनेन उपधादीर्घे सकारलोपे नकारलोपे च **मातृहा** इति रूपम्।

१७.१३) छन्दसि गत्यर्थेभ्यः॥ (३.३.१२६)

सूत्रार्थः - ईषदादिषूपपदेषु गत्यर्थेभ्यो धातुभ्यश्छन्दसि युच् स्यात्।

सूत्रावतरणम् - छन्दसि ईषदादिषु उपपदेषु गत्यर्थकेभ्यः धातुभ्यः युच्-प्रत्ययविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण गत्यर्थकेभ्यः धातुभ्यः युच्-प्रत्ययः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। छन्दसि इति सप्तम्यन्तं पदम्। गत्यर्थेभ्यः इति पञ्चम्यन्तं पदम्। गतिः अर्थः येषां तेभ्यः गत्यर्थेभ्यः। आतो युच् इति सूत्रात् युच् इति अनुवर्तते। ईषद्-दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् इति सूत्रात् ईषद्-दुःसुषु कृच्छ्राकृच्छ्रार्थेषु इति पदद्वयमनुवर्तते। धातोः प्रत्ययः परः चेति अधिकृतमस्ति। ततश्च सूत्रार्थो भवति छन्दसि कृच्छ्राकृच्छ्रार्थेषु ईषद्-दुःसुषु उपपदेषु गत्यर्थकेभ्यः धातुभ्यः युच्-प्रत्ययः परः स्यात् इति।

उदाहरणम् - सूपसदनः।

सूत्रार्थसमन्वयः:- सु-उपपदपूर्वस्य उप-उपपदपूर्वस्य च सद्-धातोः गत्यर्थकत्वात् प्रकृतसूत्रेण युच्-प्रत्यये अनुबन्धलोपे सु उप सद् यु इति स्थिते युवोरनाकौ इत्यनेन यु इत्यस्य स्थाने अनादेशे सु उप सद् अन इति जाते सवर्णदीर्घे संयोगे निष्पन्नस्य सूपसदन इत्यस्य उपपदे समासे प्रातिपदिकसंज्ञायां सौ अनुबन्धलोपे **सूपसदनः** इति रूपम्।

१७.१४) अन्येभ्योऽपि दृश्यते॥ (३.३.१३०)

सूत्रार्थः - गत्यर्थेभ्यो येऽन्ये धातवस्तेभ्योऽपि छन्दसि युच् स्यात्।

सूत्रावतरणम् - गत्यर्थकाः ये अन्ये धातवः सन्ति तेभ्योऽपि छन्दसि युच्-प्रत्ययविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण युच्-प्रत्ययः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। अन्येभ्यः अपि दृश्यते इति सूत्रगतपदच्छेदः।अन्येभ्यः इति पञ्चम्यन्तं पदम्। अपि इति अव्ययपदम्। दृश्यते इति क्रियापदम्। आतो युच् इति सूत्रात् युच् इति अनुवर्तते। ईषद्-दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् इति सूत्रात् ईषद्-दुःसुषु कृच्छ्राकृच्छ्रार्थेषु इति पदद्वयमनुवर्तते। छन्दसि गत्यर्थेभ्यः इति सूत्रात् छन्दसि इति पदमनुवर्तते। धातोः प्रत्ययः परः चेति अधिकृतमस्ति। ततश्च सूत्रार्थो भवति छन्दसि कृच्छ्राकृच्छ्रार्थेषु ईषद्-दुःसुषु उपपदेषु गत्यर्थकेभ्यः अन्येभ्यो धातुभ्यः युच्-प्रत्ययः परः स्यात् इति।

उदाहरणम् - सुवेदनाम्।

सूत्रार्थसमन्वयः- सु-उपपदपूर्वकस्य विद्-धातोः गत्यर्थभिन्नार्थकत्वात् प्रकृतसूत्रेण युचि अनुबन्धलोपे सुविद् यु इति स्थिते युवोरनाकौ इत्यनेन यु-इत्यस्य अनादेशे सुविद् अन इति जाते विदः इकास्य गुणे एकारे सु वेद् अन इति स्थिते संयोगे उपपदसमासे प्रातिपदिकसंज्ञायां स्त्रीत्वविवक्षायां टापि विभक्तिकार्ये **सुवेदनाम्** इति रूपम्।

१७.१५) लिङर्थे लेट्॥ (३.४.७)

सूत्रार्थः - विध्यादौ हेतुहेतुमद्भावादौ च धातोर्लेट् स्याच्छन्दसि।

सूत्रावतरणम् - छन्दसि विध्यादिषु हेतुहेतुमद्भावादिषु च धातोः लेट्-विधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण छन्दसि विध्यादिषु हेतुहेतुमद्भावादिषु च धातोः लेट् लकारः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। लिङर्थे इति सप्तम्यन्तं पदम्। लेट् इति प्रथमान्तं पदम्। छन्दसि लुङ्-लङ्-लिटः इत्यस्मात् सूत्रात् छन्दसि इत्यनुवर्तते। अन्यतरस्यामित्यपि पूर्वसूत्रात् अनुवर्तते। धातोः प्रत्ययः परः चेति अधिकृतमस्ति। तदा च छन्दसि लिङर्थे धातोः लेट् प्रत्ययः परः इति वाक्ययोजना। लिङर्थो नाम विध्यादिः हेतुहेतुमद्भावादिः च। ततश्च सूत्रार्थः भवति छन्दसि विध्यादौ हेतुहेतुमद्भावादौ च धातोर्लेट् स्यात् इति।

उदाहरणम् - जोषिषत्। तारिषत्।

सूत्रार्थसमन्वयः - जुष्-धातोः लिङर्थे प्रकृतसूत्रेण लेटि प्रथमपुरुषैकवचने तिपि "सिब्बहुलं लेटि" इति सूत्रेण सिप्प्रत्यये अनुबन्धलोपे जुष् स् ति इति जाते "लेटोऽडाटौ" इति सुत्रेण अडागमे "आर्धधातुकस्येड्वलादेः" इति सूत्रेण इडागमे अनुबन्धलोपे जुष् इ स् अ ति इति जाते "इतश्च लोपः परस्मैपदेषु" इति सूत्रेण तिपः इकारस्य लोपे "पुगन्तलघूपधस्य च" इति सूत्रेण उपधागुणे "आदेशप्रत्यययोः" इत्यनेन सस्य षत्वे **जोषिषत्** इति रूपम्।

तृ-धातोः लिङर्थे प्रकृतसूत्रेण लेटि तिपि सिप्प्रत्यये अडागमे अनुबन्धलोपे तृ स् अ ति इति जाते "सार्वधातुकार्धधातुकयोः" इति सूत्रेण ऋकारस्य गुणे अकारे रपरत्वे इडागमे अनुबन्धलोपे तर् इ स् अति इति जाते "व्यत्ययो बहुलम्" इति सूत्रेण तकारोत्तरस्याकारस्य आकारे "इतश्च लोपः परस्मैपदेषु" इत्यनेन इकारस्य लोपे सस्य षत्वे **तारिषत्** इति रूपम्।

१७.१६) इतश्च लोपः परस्मैपदेषु॥ (३.४.९७)

सूत्रार्थः - लेटस्तिङामितो लोपो वा स्यात्परस्मैपदेषु।

सूत्रावतरणम् - परस्मैपदेषु विकल्पेन लेटः तिङामितो लोपविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - विधिसूत्रमिदम्। सूत्रेणानेन लेटः इकारस्य परस्मैपदेषु वा लोपो विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। इतः च लोपः परस्मैपदेषु इति सूत्रगतपदच्छेदः। इतः इति षष्ठ्यन्तं पदम्। च इति अव्ययपदम्। लोपः इति प्रथमान्तं पदम्। परस्मैपदेषु इति सप्तम्यन्तं पदम्। लेटोऽडाटौ इति सूत्रात् लेटः इति अनुवर्तते। वा इत्यपि वैतोऽन्यत्र इत्यस्मात् पूर्वसूत्रात् अनुवर्तते। तदा च लेटः इतः वा

लोपः परस्मैपदेषु इति वाक्ययोजना। ततश्च सूत्रार्थः भवति लेटः तिङाम् ह्रस्व-इकारस्य विकल्पेन लोपः स्यात् परस्मैपदेषु इति।

उदाहरणे सूत्रार्थसमन्वयः - जोषिषत्-जुष्-धातोः लिङर्थे प्रकृतसूत्रेण लेटि प्रथमपुरुषैकवचने तिपि "सिब्बहुलं लेटि" इति सूत्रेण सिप्प्रत्यये अनुबन्धलोपे जुष् स् ति इति जाते "लेटोऽडाटौ" इति सुत्रेण अडागमे "आर्धधातुकस्येड्वलादेः" इति सूत्रेण इडागमे च अनुबन्धलोपे जुष् इ स् अ ति इति जाते "इतश्च लोपः परस्मैपदेषु" इति सूत्रेण तिपः इकारस्य लोपे "पुगन्तलघूपधस्य च" इति सूत्रेण उपधागुणे "आदेशप्रत्यययोः" इति सस्य षत्वे **जोषिषत्** इति रूपम्।

१७.१७) लेटोऽडाटौ॥ (३.४.९४)

सूत्रार्थः - लेटः अट् आट् एतावागमौ स्तः तौ च पितौ।

सूत्रावतरणम् - लेट्-लकारस्य अट् आट् इति आगमविधानार्थं तेषां पित्त्वविधानाय च सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण लेट्-लकारस्य अट् आट् इति आगमौ विधीयेते। अस्मिन् सूत्रे द्वे पदे स्तः। लेटः अडाटौ इति सूत्रगतपदच्छेदः। लेटः इति षष्ठ्यन्तं पदम्। अडाटौ इति प्रथमान्तं पदम्। अट् च आट् च अडाटौ। आडुत्तमस्य पिच्च इति सूत्रात् पित् इत्यनुवर्तते, तच्च द्विवचनान्ततया विपरिणमते। ततश्च सूत्रार्थो भवति लेटः अडाटौ आगमौ स्तः तौ च पितौ इति।

उदाहरणम् - तारिषत्।

सूत्रार्थसमन्वयः- तॄ-धातोः लेटि अनुबन्धलोपे तॄ ल् इति स्थिते लस्य स्थाने तिपि अनुबन्धलोपे तॄ ति इति स्थिते पूर्वोक्तसूत्रेण अडागमे अनुबन्धलोपे तॄ अ ति इति जाते सिब्बहुलं लेटि इत्यनेन सिप्-प्रत्यये अनुबन्धलोपे तॄ स् अ ति इति जाते सिब्बहुलं णिद्वक्तव्यः इत्यनेन वार्तिकेन सस्य णिद्वद्भावम् अङ्गीकृत्य तस्मिन् परतः ऋकारस्य अचो ञ्णिति इत्यनेन वृद्धौ तार् स् अ ति इति जाते इडागमे अनुबन्धलोपे तार् इ स् अ ति इति जाते इतश्च लोपः परस्मैपदेषु इत्यनेन विकल्पेन इकारस्य लोपविधानाद् आदेशप्रत्यययोः इत्यनेन सकारस्य षकारे **तारिषत्** इति रूपम् सिध्यति।

१७.१८) स उत्तमस्य॥ (३.४.९८)

सूत्रार्थः - लेडुत्तमसकारस्य वा लोपः स्यात्।

सूत्रावतरणम् - लेडुत्तमस्य सकारस्य विकल्पेन लोपविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण लेडुत्तमस्य सकारस्य विकल्पेन लोपः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। स इति प्रथमान्तं पदम्। उत्तमस्य इति षष्ठ्यन्तं पदम्। इतश्च लोपः परस्मैपदेषु इत्यस्मात् सूत्रात् लोपः इत्यनुवर्तते। लेटोऽडाटौ इति सूत्रात् लेटः इति अनुवर्तते। वा इत्यपि वैतोऽन्यत्र इत्यस्मात् पूर्वसूत्रात् अनुवर्तते। ततश्च सूत्रार्थो भवति लेटः उत्तमस्य सकारस्य विकल्पेन लोपः स्यात् इति।

उदाहरणम् - करवाव।

सूत्रार्थसमन्वयः- कृ-धातोः लेटि अनुबन्धलोपे कृ ल् इति स्थिते लस्य स्थाने वसि कृ वस् इति जाते तनादिकृञ्भ्य उः इत्यनेन उप्रत्यये कृ उ वस् इति जाते ऋकारस्य गुणे कर् उ वस् इति जाते लेटोऽडाटौ इत्यनेन (पिति) आडागमे अनुबन्धलोपे कर् उ आ वस् इति जाते उकारस्य गुणे अवादेशे च कर् अव् आ वस् इति जाते पूर्वोक्तसूत्रेण विकल्पेन सकारलोपे सर्ववर्णसम्मेलने **करवाव** इति रूपम्। सकारलोपाभावपक्षे **करवावः** इति रूपम्।

१७.१९) आत ऐ॥ (३.४.९५)

सूत्रार्थः - लेटः आकारस्य ऐ स्यात्।

सूत्रावतरणम् - लेट्-लकारस्य आकारस्य ऐकारविधनाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण लेट्-लकारस्य आकारस्य ऐकारः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। आत इति षष्ठ्येकवचनान्तं पदम्। ऐ इति लुप्तप्रथमान्तम्। लेटोऽडाटौ इति सूत्रात् लेटः इति अनुवर्तते। ततश्च सूत्रार्थो भवति लेटः आकारस्य ऐकारः स्यात् इति।

उदाहरणम् - मादयैते इत्युदाहरणम्।

सूत्रार्थसमन्वयः- मादि-धातोः लेटि अनुबन्धलोपे मादि ल् इति स्थिते लस्य स्थाने आताम्-प्रत्यये मादि आताम् इति जाते लेटोऽडाटौ इत्यनेन आडागमे अनुबन्धलोपे मादि आ आताम् इति जाते इकारस्य गुणे एकारे अयादेशे च माद् अय् आ आताम् इति जाते पूर्वोक्तसूत्रेण आतामः आकारस्य ऐकारे मादय् आ ऐताम् इति जाते टित आत्मनेपदानां टेरे इत्यनेन टेः एत्वे मादय् आ ऐ त् ए इति आटश्च इति वृद्धौ एकादेशे ऐकारे मादय् ऐ त् ए इति जाते सर्ववर्णसम्मेलने **मादयैते** इति रूपम्।

१७.२०) सिब्बहुलं लेटि॥ (३.१.३४)

सूत्रार्थः - लेटि धातोः सिप्-प्रत्ययः बहुलं स्यात्।

सूत्रावतरणम् - लेटि धातोः बाहुल्येन सिप्-प्रत्ययविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण लेट्-लकारे धातोः बाहुल्येन सिप्-प्रत्ययः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। सिप् बहुलं लेटि इति सूत्रगतपदच्छेदः। सिप् इति प्रथमान्तं पदम्। बहुलम् इति अपि प्रथमान्तं पदम्। लेटि इति सप्तम्यन्तं पदम्। धातोः प्रत्ययः परः चेति अधिकृतमस्ति। ततश्च सूत्रार्थो भवति लेटि धातोः सिप्-प्रत्ययः बहुलं स्यात् इति।

उदाहरणम् - जोषिषत्।

सूत्रार्थसमन्वयः -जुष्-धातोः लिङर्थे प्रकृतसूत्रेण लेटि प्रथमपुरुषैकवचने तिपि "सिब्बहुलं लेटि" इति प्रकृतसूत्रेण सिप्प्रत्यये अनुबन्धलोपे जुष् स् ति इति जाते "लेटोऽडाटौ" इति सुत्रेण अडागमे "आर्धधातुकस्येड्वलादेः" इति सूत्रेण इडागमे च अनुबन्धलोपे जुष् इ स् अ ति इति जाते "इतश्च लोपः परस्मैपदेषु" इति सूत्रेण तिपः इकारस्य लोपे "पुगन्तलघूपधस्य च" इति सूत्रेण उपधागुणे ओकारे "आदेशप्रत्यययोः" इत्यनेन सस्य षत्वे **जोषिषत्** इति रूपम् सिद्ध्यति।

पाठगतप्रश्नाः-२

९. अवयाः श्वेतवाः पुरोडाश्च इत्यस्य कोऽर्थः।
१०. विजुपे च्छन्दसि इति सूत्रस्य पदच्छेदः दर्शनीयः।
११. विजुपे च्छन्दसि इति सूत्रेण कस्माद्धातोः कः प्रत्ययः विधीयते।
१२. उपयज्-इति शब्दस्वरूपस्य प्रातिपदिकसंज्ञाविधायकं सूत्रं किम्।
१३. आतो मनिन्क्वनिब्वनिपश्च इति सूत्रे चकारग्रहणेन किं सिद्ध्यति।
१४. हन्तेर्बहुलं क्विप् केन विधीयते।
१५. गत्यर्थेभ्यो धातुभ्यश्छन्दसि युच् केन भवति।
१६. गत्यर्थेभ्यो येऽन्ये धातवस्तेभ्योऽपि छन्दसि युच् केन भवति।
१७. विध्यादौ हेतुहेतुमद्भावादौ च धातोर्लेट् केन भवति।
१८. इतश्च लोपः परस्मैपदेषु इत्यस्य कोऽर्थः।
१९. लेटः अट् आट् एतौ आगमौ केन सूत्रेण भवतः।
२०. स उत्तमस्य इति सूत्रेण किं विधीयते।
२१. सुदामा इत्यस्य कोऽर्थः।
२२. आत ऐ इति सूत्रेण किं विधीयते।
२३. छन्दसि विध्यादौ हेतुहेतुमद्भावादौ च धातोर्लेट् केन विधीयते।
२४. अन्येभ्योऽपि दृश्यते इत्यस्य कोऽर्थः।
२५. लिङर्थः कः।
२६. मातरं हतवान् इत्यर्थे किं रूपम्।

पाठसारः

पाठेऽस्मिन् इन्, ण्वि, ञ्युट्, विट्, विच्, क्विप् इत्यादीनाम् केषाञ्चित् प्रत्ययानाम् ससूत्रम् प्रयोगः प्रदर्शितः। तत्र च केषाञ्चित् वैदिकशब्दानाम् लौकिकरूपाणि अपि प्रदर्शितानि। तथापि पाठविस्तरभयात् न सर्वाणि रूपाणि ससूत्रम् प्रदर्शितानि। तानि च स्वयं बोद्धव्यानि। केचित् निपातनसिद्धशब्दाः अपि आलोचिताः। अन्ते च लेट्लकारसम्बन्धिनी चर्चा अपि विहिता।

पाठान्तप्रश्नाः

१. छन्दसि गत्यर्थेभ्यः इति सूत्रं व्याख्यात।
२. अन्येभ्योऽपि दृश्यते इति सूत्रं व्याख्यात।
३. बहुलं छन्दसि इति सूत्रं व्याख्यात।
४. हव्येऽनन्तःपादम् इति सूत्रं व्याख्यात।
५. छन्दसि सहः इति सूत्रस्य व्याख्यानं कुरुत।
६. उपयट् सुदामा इति रूपद्वयं च यथासूत्रं साधयत।

पाठगतप्रश्नानामुत्तराणि

उत्तरकूटः-१

१. सिद्धप्रक्रियस्य निर्देशो हि निपातः।
२. याचनम्।
३. पृतनाषाट्।
४. झलां जशोऽन्ते।
५. छन्दसि वन्-धातोः सन्-धातोः रक्ष्-धातोः मथ्-धातोः च कर्मणि नाम कर्मण्युपपदे इन्-प्रत्ययः स्यादिति।
६. हव्येऽनन्तःपादम्।
७. मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्।
८. छन्दसि सप्युपपदे वहः ण्विः स्यात्।

उत्तरकूटः-२

९. सम्बुद्धौ कृतदीर्घाः अवयाः श्वेतवाः पुरोडाः उक्थशाः इत्येते शब्दाः निपात्यन्ते इति।
१०. विच् उपे छन्दसि इति सूत्रगतपदच्छेदः।
११. यज्धातोः विच्प्रत्ययः विजुपे च्छन्दसि इति सूत्रेण विधीयते।
१२. कृत्तद्धितसमासाश्च इति अत्र प्रातिपदिकसंज्ञाविधायकं सूत्रम्।
१३. विच्प्रत्ययः सिद्ध्यति।
१४. बहुलं च्छन्दसि इत्यनेन।
१५. च्छन्दसि गत्यर्थेभ्यः इत्यनेन।
१६. अन्येभ्योऽपि दृश्यते इति सूत्रेण।
१७. लिङर्थे लेट् इति सूत्रेण।
१८. लेटस्तिङामितो लोपो वा स्यात्परस्मैपदेषु।
१९. लेटोऽडाटौ इति सूत्रेण।

२०. लेड्ुत्तमसकारस्य वैकल्पिकलोपः विधीयते।

२१. शोभनं ददाति इत्यर्थः।

२२. लेटः आकारस्य ऐकारः विधीयते।

२३. लिङर्थे लेट्।

२४. गत्यर्थेभ्यो येऽन्ये धातवस्तेभ्यो छन्दसि युच् स्यात् इति।

२५. हेतुहेतुमद्भावादिः विध्यादिः च।

२६. मातृहा।

इति सप्तदशः पाठः